# केन्द्रीय विद्यालय संगठन मुंबई संभाग
# सेतु पाठ्यक्रम
# सत्र:- 2022-23

## कक्षा – अष्टमी

माड्यूल – 1

दिवस :- प्रथमः कक्षा : अष्टमी

दिनांक : -----/-----/ 2022 वर्णमाला ज्ञानम् / उच्चारणम्

समय : ……………………

| | |
|---|---|
| शिक्षण – अधिगम – उद्देश्यानि **TLOs** | 1. छात्राः संस्कृतेन वर्णमालायाः ज्ञानम् प्राप्स्यन्ति \|<br>2. छात्राः स्वराणां ,व्यञ्जनानां च ज्ञानम् प्राप्स्यन्ति \|<br>3. छात्राः दीर्घ -स्वराणां ह्रस्व -स्वराणां च ज्ञानं प्राप्स्यन्ति \|<br>4. संयुक्त –वर्णानाम् वर्ण-विच्छेदस्य ज्ञानं प्राप्स्यन्ति \|<br>5 छात्राः शुद्धलेखने समर्थाः भविष्यन्ति \| अनेन छात्राणां भाषा-कौशलस्य विकासः भविष्यति \| |
| विषयवस्तु **Content** | संस्कृत वर्णमाला :-<br>स्वराः - अ, आ, इ, ई, उ, ऊ, ऋ, ए, ऐ, ओ, औ<br>अनुस्वार- अं विसर्ग: अ:<br>व्यंजनाः क, ख, ग, घ, ङ<br>च, छ, ज, झ, ञ<br>ट, ठ, ड, ढ, ण<br>त, थ, द, ध, न<br>प, फ, ब, भ, म<br>य, र, ल, व<br>श, ष, स, ह<br>संयुक्त व्यंजन- क्ष, त्र, ज्ञ, श्र<br>इत्यादयः |
| शिक्षक गतिविधि एवम् निर्देशाः | 1. शिक्षकः स्वराणां व्यञ्जनानां च उच्चारणसमयः प्रयोगेन प्रदर्शयिष्यति \|<br>2. शिक्षकः पदानां वर्ण –विच्छेदं कृत्वा स्वर –व्यञ्जनयोः प्रयोगस्य उदाहरणं प्रस्तोष्यति |
| शिक्षण – अधिगम – सामग्री | शिक्षकः पाठन-समये कक्षायां आवश्यकतानुसारं उपयोगं करिष्यति ,सामग्री विषयानुरूपं भवेत् \| उपयोगी स्यात् \| बलात् अस्य उपयोगं न करणीयम् सामग्री स्पष्टं रुचिकरं च भवेत् \|<br>चार्ट पेपर,कार्यपत्रम्,पीपीटी ,यू TUBE श्याम पट्ट:/सूचना पट्ट मानचित्रम् मोबाइल टेलीफोन इत्यादि \| |
| \|मूल्याकनम् | छात्राणां उच्चारणस्य परीक्षणं मौखिक-परीक्षया भविष्यति \| लिखित –मूल्याङ्कनम् एक –पदेन ,एक-वाक्येन प्रश्नैः भवेत् \|<br>प्रदत्तेषु वर्णेषु संयोजनम् करोतु \|<br>यथा र् + आ + म् + अः = रामः<br>अथवा<br>वर्णानां संयोजनम् कृत्वा पदनिर्माणं कुरुत<br>भवति = भ् + अ + व् + अ + त् + इ |

| | |
|---|---|
| | |
| प्रतिक्रिया **Feedback** | 1. छात्राः स्वराणां ,व्यञ्जनानां च उच्चारणे अर्हता प्राप्स्यन्ति \| |

माड्यूल – 2

दिवस :- द्वितीयः कक्षा : अष्टमी

दिनांक : -----/-----/ 2022 कथा –कथनम्

समय : ………………….

| | |
|---|---|
| शिक्षण – अधिगम – उद्देश्यानि **TLOs** | 1. वाचन कौशलम् / कथा–कथनम्<br>2.छात्राणां पठन-कौशलस्य विकासः भविष्यति \| हलन्त –पदानां विसर्ग-युक्त पदानां पाठने छात्राणां योग्यता वर्धिष्यते \|<br>3.वाक्येषु कुत्र आरोहः भवेत् कुत्र च अवरोहः भवेत् इति ज्ञास्यन्ति<br>4.संधियुक्त-पदानां समासयुक्त पदानां पठने योग्यता भविष्यति \|<br>5.छात्राः अर्थाववोधनेऽपि योग्यताम् प्राप्स्यन्ति \| गद्यान्शस्य भावावबोधने अपि छात्राणां योग्यताः वर्धिष्यन्ते |
| विषयवस्तु **Content** | १. (प्रथमा कथा )एकस्मिन् वने कश्चन व्याध: जाल विस्तीर्य दूरे स्थित:। क्रमश: आकाशे सपरिवार: कपोतराज: चित्रग्रीव: निर्गत:। तदा तण्डुलकणानामुपरि कपोतानां लोभो जात:। परन्तु राजा तत्र सहमत: नासीत्। तस्य युक्ति: आसीत् यदि निर्जने वने कोऽपि मनुष्यो नास्ति तर्हि कुतो वा तण्डुलकणानां सम्भव:? यदा राज्ञ: उपदेशमस्वीकृत्य ते नीचै: आगता, तदा जाले निपतिता:। अत: उक्तम् ‘सहसा विदधीत न क्रियाम्’।<br><br>२. (द्वितीया कथा) एकः वृद्धः आसीत्। सः क्षुधितः अभवत्। समीपे एकः आम्रवृक्षः आसीत्। वृद्धः आम्रवृक्षस्य समीपम् अगच्छत्। वृक्षे बहूनि फलानि अपश्यत्।सः अचिन्तयत्*अहं वृद्धः। मम शरीरे शक्तिः नास्ति। वृक्षः उन्नत अस्ति। कथम् उपरि गच्छामि। कथं फलं प्राप्नोमि*।वृक्षस्य उपरि वानराः आसन्। वृद्धः एकम् उपायम् अकरोत्। सः पाषाणखण्डान् स्वीकृत्य अक्षिपत्। वानराः कुपिताः अभवन्। ते फलानि अक्षिपन्। वृद्धः तानि फलानि स्वीकृत्य सन्तोषेण अखादत्। |
| शिक्षक गतिविधि एवम् निर्देशाः | 1. शिक्षकः आदर्श वाचनम् करिष्यति दीर्घ-पदानां उच्चारणे छात्राणां ध्यान आकृष्टं<br>करिष्यति \|<br>2. शिक्षकः कथाधारित-गद्यान्शस्य प्रस्तुतीकरणम् करिष्यति \|<br>3. कथा –लघ्वी भवेत् परन्तु मनोविनोद्कारिणी प्रेरणादायिनी च भवेत् येन छात्राः<br>मनोयोगेन ध्यानं दत्वा पठेत् \| ( शिक्षकः कथायाः चयनं छात्राणां स्तरानुकूलं<br>एव कुर्यात् \| |

| | |
|---|---|
| शिक्षण – अधिगम – सामग्री | 1. शिक्षकः पाठन-समये कक्षाया आवश्यकतानुसार उपयोग करिष्यति ,सामग्री<br>विषयानुरूपं भवेत् \| उपयोगी स्यात् \| बलात् अस्य उपयोगं न करणीयम् सामग्री स्पष्टं रुचिकरं च भवेत् \|<br>2. चार्ट पेपर, कार्यपत्रम्,पीपीटी ,यू TUBE श्याम पट्ट:/सूचना पट्ट मानचित्रम् मोबाइलटेलीफोन<br>3. कथाधारितं चित्रस्य पट्टम् नीत्वा एव कथायाः पाठनं कुर्यात् \| यदि पी पी टी<br>माध्यमेन पाठनं भवेत् तर्हि सम्यक् अवबोधनं भविष्यति<br>अन्यमपि मनोरञ्जकं साधनं शिक्षकस्य समीपे विद्यते तेन पाठनं कर्तुं शक्यते \|<br>चार्ट पेपर, कार्यपत्रम्,पीपीटी ,यू TUBE श्याम पट्ट:/सूचना पट्ट<br>4. मानचित्रम् मोबाइल टेलीफोन<br>5. शिक्षकः कक्षायां पर्याप्तं शिक्षण-सामग्री स्वीकृत्य एव पाठनम् करिष्यति \| कथा<br>शिक्षणे \| |
| \|मूल्याकनम् | 1. गद्यम् पठित्वा एक पदेन एक वाक्येन च प्रश्नाः वर्णविच्छेद कुरुत । वर्ण संयोजनम् कुरुत\|<br>2. छात्राणामधिगमस्य मूल्यांकनम् भविष्यति , येन आगामी कक्षायाम् शिक्षकः<br>योजना –निर्माणं करिष्यति \| |
| प्रतिक्रिया **Feedback** | छात्राः पठने आरोह अवरोह प्रयुज्य हलन्त विसर्ग युक्ताना पदाना तथा संधियुक्त तथा समस्त पदानां वाचने आनन्दम् अनुभवन्ति \| |

माड्यूल – 3

दिवस :- तृतीयः कक्षा : अष्टमी

दिनांक : -----/-----/ 2022 अभिनय दक्षता

समय : ......................

| | |
|---|---|
| शिक्षण – अधिगम – उद्देश्यानि **TLOs** | 1. वाचन कौशलम् / कथा–कथनम्<br>2. छात्राणां अभिनय कौशलस्य विकासः भविष्यति \| शब्दानाम् शुद्धोच्चारणे अपि<br>छात्राणां योग्यता वर्धिष्यते \| अभिनय-काले आरोहावरोहणे छात्राणां योग्यता<br>वर्धिष्यते \| .वाक्येषु कुत्र आरोहः भवेत् कुत्र च अवरोहः भवेत् इति ज्ञास्यन्ति \|<br>3. संधियुक्त-पदानां समासयुक्त पदानां पठने योग्यता भविष्यति \|<br>छात्राः अर्थाववोधनेऽपि योग्यताम् प्राप्स्यन्ति \| अभिनय-समये भावावबोधने अपि छात्राणां योग्यताः वर्धिष्यन्ते |
| विषयवस्तु **Content** | माता– राघव! त्वं किं करोषि?<br>राघवः– अहं मम विद्यालयस्य गृहकार्यं करोमि।<br>माता– पुत्र! गृहकार्यानन्तरम् आपणं गत्वा ततः दुग्धं शाकफलानि च आनय। |

| | |
|---|---|
| | राघवः– अहं सायं काले पुस्तकं क्रेतुम् आपणं गमिष्यामि तदा दुग्धं शाकफलानि च आनेष्यामि।<br>माता– सायंकालेन, त्वं तु पूर्वमेव गत्वा आनय।<br>राघवः– शीघ्रं किमर्थम्?<br>माता– अद्य तव मातुलः आगमिष्यति, अतःभोजनं समयात्पूर्वमेव पक्ष्यामि।<br>राघवः– मातुल: आगमिष्यति चेत् अहम् इदानीम् एव गत्वा वस्तूनि क्रीत्वा . आगच्छामि। |
| शिक्षक गतिविधि एवम् निर्देशाः | शिक्षकः आरोहावरोह –क्रमेण आदर्श वाचनम् करिष्यति दीर्घ-पदानां उच्चारणे छात्राणां ध्यानं आकृष्टं करिष्यति \|<br>मौखिक (वार्तालाप)लिखित-परीक्षया शिक्षकः परीक्षणं करिष्यति \|<br>लिखित –मूल्याङ्कनम् एक –पदेन ,एक-वाक्येन प्रश्नैः भवेत् \|<br>शिक्षकः छात्रैः सह व्यक्तिगतं सामूहिकं च वार्तालापं करिष्यति |
| शिक्षण – अधिगम – सामग्री | 1.शिक्षकः पाठन-समये कक्षाया आवश्यकतानुसार उपयोग करिष्यति ,सामग्री विषयानुरूपं भवेत् \| उपयोगी स्यात् \| बलात् अस्य उपयोगं न करणीयम्<br>सामग्री स्पष्टं रुचिकरं च भवेत् \|<br>2. चार्ट पेपर, कार्यपत्रम्,पीपीटी ,यू TUBE श्याम पट्ट:/सूचना पट्ट मानचित्रम् मोबाइलटेलीफोन |
| \|मूल्याकनम् | मौखिक (वार्तालाप)लिखित-परीक्षया शिक्षकः परीक्षणं करिष्यति \|<br>लिखित –मूल्याङ्कनम् एक –पदेन ,एक-वाक्येन प्रश्नैः भवेत् \| |
| प्रतिक्रिया **Feedback** | विद्यार्थिनः : परस्परं संस्कृत –भाषाया वार्तालापस्य प्रयासं करिष्यति |

माड्यूल – 4

दिवस **:-** चतुर्थः कक्षा **:** अष्टमी

दिनांक : -----/-----/ 2022 अभिव्यक्ति कौशलम्

समय : ......................

| | |
|---|---|
| शिक्षण – अधिगम – उद्देश्यानि **TLOs** | 1. वाचन कौशलम् / कथा–कथनम्<br>2. संस्कृते छात्राणां रूचिः जागरिष्यन्ति \| वार्तालापाय ते उन्मुखाः भविष्यन्ति \|<br>5. छात्राणां वार्तालापदक्षतायाः विकासः \|<br>छात्राः वाक्य-निर्माणे सहजा अनुभूतिं करिष्यति \| |
| विषयवस्तु **Content** |  |

| | |
|---|---|
| |  |
| शिक्षक गतिविधि एवम् निर्देशाः | शिक्षकः संस्कृतस्य वाक्य-योजना-प्रक्रियायाः ज्ञान प्रदास्यति \| शिक्षकः लिङ्गवचनविभक्ति-प्रयोगं कृत्वा वाक्य-निर्माणम् करिष्यति<br>शिक्षकः<br>प्रथम पुरुष मध्यम पुरुष उत्तम पुरुष एतेषु<br>सर्वनाम्नः प्रयोगं कृत्वा वाक्य- रचनायाः अभ्यासः कारयिष्यति \|<br>मम – अस्माकम् तव –युष्माकम् एतेषां<br>प्रयोगं कृत्वा वार्तालापाय प्रेरणां प्रदास्यति \| |
| शिक्षण – अधिगम – सामग्री | चार्टपत्रम्, ppt, youtube<br>शिक्षकः पाठन-समये कक्षायां आवश्यकतानुसारं उपयोगं करिष्यति सामग्री विषयानुरूपं भवेत् \| उपयोगी स्यात् \| बलात् अस्य उपयोगं न करणीयम् सामग्री स्पष्टं रुचिकरं च भवेत् \| |
| मूल्याकनम् | छात्राणा स्तरानुसार मूल्याङ्कनाय सरल –वाक्यानां प्रश्नाः सन्तु \| तत्र एक पदस्य एक वाक्यस्य च प्रश्नाः भवेयुः \| शब्द-कोष-ज्ञानस्य मूल्याङ्कनाय विलोम पदानि,समानार्थक पदानि च प्रश्नेषु भवेयुः \| |
| प्रतिक्रिया **Feedback** | 1. छात्राणाम् संस्कृत-भाषाम् प्रति आकर्षण भविष्यति \|<br>2. छात्राः संवाद-स्थापनाय आत्म-विश्वासस्य अनुभवं करिष्यन्ति |

माड्यूल – **5**

दिवस :- पञ्चमः कक्षा : अष्टमी

दिनांक : -----/-----/ 2022 संख्या-ज्ञानम्

समय : …………………..

| | |
|---|---|
| शिक्षण – अधिगम – उद्देश्यानि<br>**TLOs** | १.छात्राः संस्कृते वस्तूना गणाना कर्तुं समर्थाः भविष्यन्ति \|<br>२. एकतः चतुर्थ-पर्यन्तम् त्रिषु लिङ्गेषु प्रयोगं कर्तुं समर्थाः भविष्यन्ति \|<br>३.संख्यायाः मूल-पदस्य ज्ञानं प्राप्स्यन्ति \|<br>4.छात्राः पुल्लिङ्गे स्त्रीलिङ्गे नपुंसकलिङ्गे च संख्या-प्रयोगं ज्ञास्यन्ति<br>5. छात्राः विशेषणस्य अपि ज्ञानं प्राप्स्यन्ति |
| विषयवस्तु<br>**Content** | एक तः १० पर्यन्तम्<br>एकः द्वौ त्रयः चत्वारः पञ्च षट् सप्त अष्ट नव दश |

| | |
|---|---|
| | <br><br><br>संख्या गणना<br>पुँल्लिंग – स्त्रीलिंग – नपुंसकलिंग<br>१. एकः एका एकम्<br>२. द्वौ द्वे द्वे<br>३. त्रयः तिस्रः त्रीणि<br>४. चत्वारः चतस्रः चत्वारि<br>५. पञ्च, पञ्च पञ्च<br>६. षट्, षट् षट्<br>७. सप्त, सप्त सप्त<br>८. अष्टौ, अष्ट, अष्टौ, अष्ट,<br>९. नव, . नव, . नव,<br>१०. दश, दश दश |
| शिक्षक गतिविधि एवम् निर्देशाः | शिक्षकः पाठनात् प्रागेव विशेषणस्य सामान्यं ज्ञानं छात्रेभ्यः प्रदास्यति \|<br>त्रिषु लिङ्गेषु संख्या –पदानां अभ्यासः कारणीयः\|<br>कक्षायां उपलब्धानां वस्तूनि दर्शयित्वा छात्रैः तेषां गणनां कारयेत् \| |
| शिक्षण – अधिगम – सामग्री | चार्टपत्रम्, ppt, youtube<br>संख्या-पदानि १तः ५० पर्यन्तम् \| शिक्षकः पाठन-समये कक्षायां आवश्यकतानुसारं उपयोगं करिष्यति ,सामग्री विषयानुरूपं भवेत् \| उपयोगी स्यात् \| बलात् अस्य उपयोगं न करणीयम्<br>चार्ट पेपर कार्यपत्रम्,पीपीटी ,यू TUBE श्याम पट्ट:/सूचना पट्ट<br>मानचित्रम् मोबाइल , टेलीफोन |
| मूल्याकनम् | १ तः 4 पर्यन्त सख्यायाः मूल्याङ्कनाय<br>बहुविकल्पात्मकाः लघूत्तरप्रश्नाः च भवेयुः \|<br>एकः बालकः(१) -------<br><br>एका बालिका (१)--------<br><br>एकं फलम् (१)-----------<br>शिक्षकः मौखिकं लिखितं च परीक्षणं करिष्यति |
| प्रतिक्रिया<br><br>**Feedback** | 1. छात्राः सस्कृत भाषाया सख्याज्ञानम् प्राप्नुवन्ति \|<br>2. संस्कृतेन गणन कार्यस्य प्रयासं कुर्वन्ति \| |



केन्द्रीय विद्‌यालय संगठन मुम्बई संभाग

सेतुपरीक्षा-प्रश्नावली

विद्‌यालयस्य नाम :- ---------------------------------------------------------------------------------
छात्रस्य/छात्रायाः नाम :-------------------------------------------------------------कक्षा:---------------------रोल :- --------------------पूर्णाङ्का:- 20दिनाङ्क :- --------------------

| प्रश्नाः | अधोलिखित –सवाद पठित्वा प्रश्नानाम् उत्तराणि लिखत \| | उत्तराणि | अङ्काः |
|---|---|---|---|
| | माता– राघव! त्वं किं करोषि?<br>राघवः– अहं मम विद्‌यालयस्य गृहकार्यं करोमि।<br>माता– पुत्र! गृहकार्यानन्तरम् आपणं गत्वा ततः दुग्धं शाकफलानि च आनय।<br>राघवः– अहं सायं काले पुस्तकं क्रेतुम् आपणं गमिष्यामि तदा दुग्धं शाकफलानि च<br>आनेष्यामि।<br>माता– सायंकालेन, त्वं तु पूर्वमेव गत्वा आनय।<br>राघवः– शीघ्रं किमर्थम्?<br>माता– अद्‌य तव मातुलः आगमिष्यति, अतःभोजनं समयात्पूर्वमेव पक्ष्यामि।<br>राघवः– मातुल: आगमिष्यति चेत् अहम् इदानीम् एव गत्वा वस्तूनि क्रीत्वा आगच्छामि। | | |
| १. | राधवःकिंकरोति ?<br>(क) गृहकार्यम् (ख) ग्रह-कार्यम् (ग)दुग्धम् (घ) पुस्तकम् | | 1 |
| | राघवःसाय काले पुस्तक क्रेतुम् कुत्र गमिष्यामि ?<br>(क)विद्‌यालयम् (ख)मन्दिरम् (ग)आपणम् (घ) गृहम् | | 1 |
| | राघवस्य गृहे कः आगमिष्यति ?<br>(क)माता (ख)पिता(ग)मित्रम् (घ) मातुलः | | 1 |
| 2 | अधोलिखित–श्लोक पठित्वा प्रश्नानाम् उत्तराणि उत्तरत<br>प्रदोषे दीपक: चन्द्र: प्रभाते दीपक: रवि:।<br>त्रैलोक्ये दीपक: धर्म: सुपुत्र: कुलदीपक:।। | | |
| | (क)प्रदोष दीपक : कः अस्ति ? (i)चन्द्रः (ii)धर्मः (iii)रविः (सुपुत्रः) | | 1 |
| | (ख)प्रभाते कः दीपकः ? (i)चन्द्रः (ii)धर्मः (iii)रविः (सुपुत्रः) | | 1 |
| | (ग)त्रैलोक्ये कः दीपक:? (i)चन्द्रः (ii)धर्मः (iii)रविः (सुपुत्रः) | | 1 |
| 3 | गद्‌याशम् पठित्वा उत्तरत | | |
| (i) | एकदा एकः काकः पिपासितः आसीत्। सः जल पातुम् इतस्ततः अभ्रमत्। परं कुत्राणि जलं न प्राप्नोत। अन्ते सः एकं घटम् अपश्यत्।<br>घटे स्वल्पम् जलम् आसीत्। अतः सः जलम् पातुम् असमर्थः अभवत्। सः एकम् उपायम् अचिन्तयत्। सः पाषाणस्य खण्डानि घटे अक्षिपत्। एवं क्रमेण घटस्य जलम् उपरि आगच्छत्। काकः जलं पीत्वा संतुष्टः अभवत्।<br>परिश्रमेण एव कार्याणि सिध्यन्ति न तु मनोरथै:\| | | |
| | एक –पदेन उत्तरत | | |

| | | | |
|---|---|---|---|
| | (क)कः पिपासितः आसीत् ?(एक-पदेन) | | 1 |
| | (ख)काकः किं पातु इतस्ततः अभ्रमत् ?(एक-पदेन) | | 1 |
| | (ग)कार्याणि केन सिध्यन्ति ? (एक-पदेन) | | 1 |
| | एक वाक्येन उत्तरत | | |
| (ii) | (क)काकः पाषाणस्य खण्डानि कुत्र आक्षेपत्? (एक वाक्ये) | | 1 |
| | (ख) कस्मिन् स्वल्पम् जलम् आसीत्? (एक वाक्ये) | | 1 |
| | (ग) काकः किं पीत्वा सतुष्टः अभवत्? (एक वाक्ये) | | 1 |
| | (घ)काकः कस्य खण्डानि घटे आक्षेपत्? | | 1 |
| | (ङ)काकः किम् अचिन्तयत् ? | | |
| **4.**सख्या–पदैः रिक्त–स्थानानि पूरयत | | | |
| वाक्य पूरयत :- चित्रे ------------------------------(१)पुस्तकम् अस्ति \| (एकः ,एकः | 1 | | |

| | |
|---|---|
| एकम् )<br> | |
| <br>चित्रे -------------------(६) तालाः सन्ति \| (षट् , शतम् ,षष्ठी ) | 1 |
| <br>चित्रे ----------------------(१०) पत्राणि सन्ति (दशाः , दशः ,दश ) | 1 |

5.प्रश्न-अधोलिखितानि पदानि आधृत्य सार्थकानि वाक्यानि रचयत- **4**

**(**निम्नलिखित पदों के आधार से वाक्य बनाये **| )**

| | | |
|---|---|---|
| वानराः | वनेषु | तरन्ति |
| सिंहाः | वृक्षेषु | नृत्यन्ति |
| मयूराः | जले | उत्पतन्ति |
| मत्स्याः | आकाशे | गर्जन्ति |
| खगाः | उद्याने | कूर्दन्ति |

वाक्यानि**:-**

1. -------------------------------------------------------------------------------------------
2. -------------------------------------------------------------------------------------------
3. -------------------------------------------------------------------------------------------
4. -------------------------------------------------------------------------------------------
5. -------------------------------------------------------------------------------------------

माड्यूल – 6

दिवस **:-** सप्तमः        कक्षा **:** अष्टमी

दिनांक : ….. / ….. / 2022        विभक्तिः (कारकम्)

समय : …………………..

| | |
|---|---|
| शिक्षण – अधिगम – उद्देश्यानि<br><br>**TLOs** | 1. कारकस्य ज्ञानम्<br>2. संस्कृत शब्दानाम् अर्थावबोधः<br>3. विभिन्नेषु विभक्तिषु शब्दानाम् लेखनम् |
| विषयवस्तु<br><br>**Content** | प्रयत्नेन कार्येषु सिद्धिर्जनानां, प्रयत्नेन सद्बुद्धिवृद्धिर्जनानां।<br>प्रयत्नेन युद्धे जयः स्याज्जनानां, प्रयत्नो विधेयः प्रयत्नो विधेयः॥१॥<br>प्रयत्नेन धीराः समुद्रं तरन्ति, प्रयत्नेन वीराः गिरीन् लङ्घयन्ति।<br>प्रयत्नेन विज्ञाः वियत्युत्पतन्ति, प्रयत्नो विधेयः प्रयत्नो विधेयः॥२॥<br>कठोरः प्रयत्नात् मृदुत्वं प्रयाति, प्रयत्नादसाध्यं भवत्येव साध्यम्।<br>प्रयत्नादयोग्याः सुयोग्या भवन्ति, प्रयत्नो विधेयः प्रयत्नो विधेयः॥३॥<br>प्रयत्नेन मुक्तिं श्रिताः भारतीयाः, प्रयत्नेन ऋद्धिं गताः भारतीयाः।<br>प्रयत्लेन विश्वप्रियाः भारतीयाः, प्रयत्नो विधेयः प्रयत्नो विधेयः॥४॥ |

| | |
|---|---|
| शिक्षक गतिविधि एवम् निर्देशाः | शिक्षकः प्रदत्त पद्यांश उचित गति लय स्पष्ट उच्चारणेन वाचन कुर्यात् तथा छात्रैः अनुवाचनम् कारयेत् \|<br>पद्यांशे कारक विभक्तियुक्त पदान् रेखाङ्कितं कुरुत \|<br>कारक विभक्तियुक्त पदेषु प्रयुक्तानां कारकानां/विभक्तीनां नामं प्रदर्शयेत् \|<br>यथा –<br>जयः – कर्ता कारकम् ( प्रथमा विभक्तिः)<br>समुद्रम् – कर्म कारकम् ( द्वितीया विभक्तिः)<br>प्रयत्नेन – करण कारकम् ( तृतीया विभक्तिः)<br>प्रयत्नात् – संप्रदान कारकम् ( पञ्चमी विभक्तिः)<br>जनानाम् – संबन्ध कारकम् ( षष्ठी विभक्तिः)<br>युद्धे – अधिकरण कारकम् ( सप्तमी विभक्तिः)<br>अनेन प्रकारेण अन्य कारक/विभक्तियुक्त पदानाम् अभ्यासं कारयते \|<br>क्रियान्वयित्वं कारकम् इत्यादि सूत्राणां आधारेण सर्वासां विभक्तीनां अवबोधं कारयते \| |
| शिक्षण – अधिगम – सामग्री | चार्टपत्रम्, ppt, youtube |
| मूल्याकनम् | 1. रेखाङ्कितेषु पदेषु का विभक्तिः प्रयुक्ता अस्ति ?<br>2. निम्नलिखित पदानां मूलशब्दं विभक्तिः वचनं च लिखत \|<br>3. प्रदत्ते श्लोके राम शब्दस्य विभक्तिरूपाणि पठितव्यानि –<br>रामो राजमणि: सदा विजयते रामं रमेशं भजे,<br>रामेणाभिहता निशाचरचमू रामाय तस्मै नम: \|<br>रामान्नास्ति परायणं परतरं रामस्य दासोस्म्यहम् ,<br>रामे चित्तलय: सदा भवतु मे भो राम मामुद्धर \|\|<br>रिक्तस्थानेषु राम शब्दस्य उचितं विभक्तिरूपं लिखत -<br>कर्ता – रामः<br>कर्म – रामम्<br>करण - --------<br>संप्रदान – रामाय<br>अपदान - ------<br>संबन्ध - --------<br>अधिकरण – रामे<br>संबोधनम् - --------<br>कोष्ठकदत्तस्य शब्दस्य उचितं रूपं प्रयुज्य वाक्यानि पूरयत।<br>1. मध्याह्ने छात्राः ________________ आगच्छन्ति। (विद्यालय)<br>2. जनक ________________ आगमिष्यति। (रविवासर)<br>3. ________________ सदस्याः मिलित्वा भोजनम् अकुर्वन्। (परिवार)<br>4. ________________ जलम् मलिनम् जातम्। (नदी)<br>5. ________________ नौका तरति। (नदी)<br>6. ________________ खगाः नीडम् रचयन्ति। (वृक्ष)<br>7. प्रधानाचार्यः ________________ पुरस्कारम् अयच्छत्। (छात्र)<br>8. भक्तः ________________ फलानि आनयति। (मुनि) |

| | |
|---|---|
| | 9. _______________ खगाः उपविशन्ति। (शाखा)<br>10. वयम् _______________ नमामः। (गुरु)<br>उत्तरम्-<br>1. विद्यालयात्<br>2. रविवासरे<br>3. परिवारस्य<br>4. नद्याः<br>5. नद्याम्<br>6. वृक्षे / वृक्षेषु<br>7. छात्राय<br>8. मुनये<br>9. शाखायाम्<br>10. गुरुम्। |
| प्रतिक्रिया<br><br>**Feedback** | 1. विद्यार्थिनः : श्लोकपाठ कृत्वा अपि विभक्तिरूपाणि अवगच्छन्ति \|<br>2. कर्ता-कर्म-क्रिया तथा विभक्ति-प्रयोगे सक्षमा: भविष्यन्ति \| |

माड्यूल – 7

दिवस :- सप्तमः कक्षा : अष्टमी

दिनांक : ….. / ….. / 2022 लकाराः (कर्तृ-क्रिया-संयोजनम्)

समय : …………………..

| | |
|---|---|
| शिक्षण – अधिगम – उद्देश्यानि<br><br>**TLOs** | 1. लकारस्य ज्ञानम्<br>2. धातु पदस्य विभिन्नेषु लकारेषु परिवर्तनम् ज्ञायते \|<br>3. विभिन्नेषु लकारेषु धातुरूपाणां लेखनम् |
| विषयवस्तु<br><br>**Content** | लक्ष्मीबाइ एका प्रमुखा सेनानायिका आसीत् \| तस्याः जनकः जननी च बिठूर राज्ये अवसताम् \| लक्ष्मीबाई शस्त्रज्ञाने अश्वारोहणे च निपुणाः आसीत् \| तस्याः विवाहः गङ्गाधररावेण सह अभवत् \| गङ्गाधररावस्य असमये मृत्युः अभवत् \| आङ्ग्लसेनानायकः ह्यूरोजः अकथयत् – "राज्ञी! आत्मसमर्पणं करोतु \|" इति \| वीराङ्गना लक्ष्मीबाई अवदत् – "भारतीया नारी प्राणान् त्यजति किन्तु शत्रोः अग्रे समर्पणं न करोति \| झांसी मम राज्यम् अस्ति \| अहं झांसी राज्यम् न दास्यामि \|" इति \| सा आङ्ग्लैः सह भीषणं युद्धम् अकरोत् \| अन्ते सा प्राणान् अत्यजत् \| अद्यापि सा अस्माकं राष्ट्रभक्तिं प्रेरयति \| |
| शिक्षक गतिविधि एवम् निर्देशाः | 1. शिक्षकः उचित आरोहावरोहक्रमेण वाचन कुर्यात् तथा छात्रैः अनुवाचनम् कारयेत् \|<br>2. गद्यांशे आगतान् विभिन्न लकारयुक्त पदान् रेखाङ्कितं कारयेत् \|<br>3. कारकानुसारं धातुरूपाणि वर्गीकृतं कारयेत् \|<br>3. धातुरूपाणां मूलधातोः निर्धारणं कुर्यात् \|<br>यथा –<br>धातुरूप — मूलधातुः — लकारः<br>अवसताम् — वस् — लङ्लकारः<br>आसीत् — अस् — लङ्लकारः<br>अभवत् — भू — लङ्लकारः<br>दास्यामि — दा — लृट्लकारः |

| | |
|---|---|
| | करोतु कृ लोट्लकारः<br>त्यजति त्यज् लट्लकारः<br>एवम् प्रकारेण अन्यान् धातुरूपाणि चित्वा तेषाम् अभ्यासं कारयेत् \|<br><br>संस्कृत में धातुओं के दस लकार हैं, जो निम्न है:<br>1. लट् लकार (Present Tense)<br>2. लोट् लकार (Imperative Mood)<br>3. लङ्ग् लकार (Past Tense)<br>4. विधिलिङ्ग् लकार (Potential Mood)<br>5. लुट् लकार (First Future Tense or Periphrastic)<br>6. लृट् लकार (Second Future Tense)<br>7. लृङ्ग् लकार (Conditional Mood)<br>8. आशीर्लिन्ग लकार (Benedictive Mood)<br>9. लिट् लकार (Past Perfect Tense)<br>10. लुङ्ग् लकार (Perfect Tense)<br><br>अवश्यमेव ध्यातव्यम् यत् अभ्यासक्रमानुसारेण संस्कृत धातुरूपाणि पञ्च लकारेषु विभक्ताः सन्ति \|<br>लट् लकारः – वर्तमान काल<br>लृट् लकार: – भविष्य काल<br>लङ्ग् लकारः – भूत काल<br>लोट् लकारः – आज्ञार्थक<br>विधिलिङ्ग लकारः – नियमार्थक / निर्देश आदि \|<br><br>4. धातवः परस्मैपद आत्मनेपद उभयपदेषु च वर्गीकृतानि सन्ति \| इति अवश्यमेव वक्तव्यम् \|<br><br>लट्लकार – वर्तमान काल<br><br><table><tr><td>पुरुष</td><td>एकवचन</td><td>द्विवचन</td><td>बहुवचन</td></tr><tr><td>प्रथम पुरुष</td><td>पठति</td><td>पठतः</td><td>पठन्ति</td></tr><tr><td>मध्यम पुरुष</td><td>पठसि</td><td>पठथः</td><td>पठथ</td></tr><tr><td>उत्तम पुरुष</td><td>पठामि</td><td>पठावः</td><td>पठामः</td></tr></table> |

लृट् लकारः – भविष्य काल

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यम पुरुष | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तम पुरुष | पठिष्यामि | पठिष्यावः | पठिष्यामः |

लङ्लकार – भूतकाल

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | अपठत् | अपठताम् | अपठन् |
| मध्यम पुरुष | अपठः | अपठतम् | अपठत |
| उत्तम पुरुष | अपठम् | अपठाव | अपठाम |

लोट्लकार – आदेश के अर्थ में

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पठतु | पठताम् | पठन्तु |

| | | | |
|---|---|---|---|
| मध्यम पुरुष | पठ | पठतम् | पठत |
| उत्तम पुरुष | पठानि | पठाव | पठाम |

| पुरुष | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम पुरुष | पठेत् | पठेताम् | पठेयुः |
| मध्यम पुरुष | पठेः | पठेतम् | पठेत |
| उत्तम पुरुष | पठेयम् | पठेव | पठेम |

विधिलिङ्लकार – संभावना के अर्थ में

निम्नलिखितानां धातूनां रूपाणि ‘पठ’ धातुः इव भवन्ति |

निन्द् ( निंदा करना ), वद् ( कहना ), क्रन्द् ( रोना ), क्रीड् ( खेलना ), खाद् ( खाने के लिए ), गर्ज् ( गर्जन करना ), चर्व् ( चबाना ), ज्वल ( जलना ), नन्द् ( खुश होना ), ब्रज् ( जाना ), चर् ( घूमना ), पत् ( गिरना ), भ्रम् ( घूमना ), लुन्थ् ( चोरी करना ), हस् ( हसना ), खन् ( खोदना ), रक्ष् ( रक्षा करना ), मूर्छ् ( बेहोश होना ).

| | |
|---|---|
| शिक्षण – अधिगम – सामग्री | चार्टपत्रम्, ppt, youtube |
| मूल्यांकनम् | अभ्यास **- 1**<br>अधोलिखतेषु रिक्तस्थानेषु कोष्ठांकित निर्देशानुसार पूर्तिं कुरुत-<br>1. सुरेशः श्वं ग्रामे …………….। (आ+गम्-लृट् लकार, प्रथम पुरुष एकवचनम्)<br>2. सर्वे छात्राः युगपत् ……………..। (चल् लट लकार प्रथम पुरुष बहुवचनम्) |

| | |
|---|---|
| | 3. एकस्मिन् नगरे एकः भिक्षुकः ……….. (वस लक्त प्रथम पुरुष एकवचनम्)<br>4. सत्यं ……………………..। धर्मं चर।। (वद् लोट मध्यम् पुरुष एकवचनम्)<br>5. अहं प्रतिदिनं विद्यालयं …………….। (गर्म-लट्-उत्तमपुरुष -एकवचनम्)<br>6. ते उद्याने ………………………..। (क्रीड्–लट्-प्रथम-पुरुष-बहुवचनम्)<br>7. छात्राः समये गृहकार्य ………..। (कृ-धातुः, विधिलित्-प्रथमपुरुष-बहुवचनम्)<br>8. वृक्षात् पत्राणि ……………………..<br>(पत्-धातु-लटलकार-प्रथमपुरुष-बहुवचनम्)<br>9. मम पार्वे दश रूप्यकाणि ……..<br>(अस-लट्-लकार-प्रथमपुरुष-बहुवचनम्।)<br>10. यदा त्वम् आमिष्यसि तदा ते ……..(ग्ल ट्-लकार-प्रथमपुरुष-बहुवचनम्।<br><br>अभ्यास : **2**<br>प्रश्नः<br>अधोलिखितानि धातुरूपाणि वाक्येषु प्रयुज्यताम् । पठिष्यामि, अपिबत्, आसीत्, पठति, करिष्यामि, सन्ति, करिष्यसि, कुर्मः, असि, पठति, अस्ति, याचते, पचति, याचति, भवति, पिबति, आसन्, हन्ति, नृत्यति, हसति।<br>1. अहं गृहे संस्कृतं पठिष्यामि।<br>2. रामः शीतलं जलम् अपिबत्।<br>3. सीता जनकस्य दुहिता आसीत्।<br>4. राकेशः गणितविषयस्य पुस्तकं पठति।<br>5. अहं गीतायाः पाठं करिष्यामि।<br>6. ग्रामम् अभितः वृक्षाः सन्ति।<br>7. त्वं कदा कार्यं करिष्यसि?<br>8. वयं नद्यां स्नानं कुर्मः |
| प्रतिक्रिया<br><br>**Feedback** | 1. विद्यार्थिनः धातुरूपाणि रूपाणि अवगच्छन्ति ।<br>2. वाक्यनिर्माणे लकार-प्रयोगे च सक्षमाः भविष्यन्ति । |

माड्यूल – 8

दिवस :- नवमः कक्षा : अष्टमी

दिनांक : ----/----/2022 रचनात्मक-कार्यम् (पत्रलेखनम् )

समय : ………………….

| | |
|---|---|
| शिक्षण – अधिगम – उद्देश्यानि<br><br>**TLOs** | 1. प्रदत्ते विषये पत्रं लिख्यते ।<br>2. शब्दसूचीम् अधिकृत्य रिक्तस्थान पूर्ति माध्यमेन पत्रलेखने कुशलतां प्राप्यते ।<br>3. लेखन कौशल विकासः साध्यते । |

<table>
<tr><td>विषयवस्तु<br>**Content**</td><td>मञ्जूषातः उचित पद चित्वा अधोदत्तेषु पत्रेषु रिक्तस्थानपूर्ति कुरुत-<br>(मित्रं प्रति नववर्षस्य शुभकामना:)<br>ए-गोविंदपुरी<br>नव दिल्ली<br>दिनाङ्क : X.X.2022<br>प्रिय मित्र अर्णव<br>____________ नमस्ते<br>अत्र सर्वविधं ____________। तत्रापि अस्तु।<br>अग्रिमे सप्ताहे ____________ शुभारम्भः भविष्यति। एतस्मिन्<br>____________ तुभ्यम् शुभकामनाः प्रेषयामि। गृहे सर्वेभ्यः मम नववर्षस्य<br>____________ ददातु। ____________ मंगलमयं भवतु।<br>अग्रजेभ्यः सादरं प्रणामाः, ____________ स्नेहराशिः।<br>भवदीयम् ____________<br>राकेशः<br><br>नववर्षस्य, अनुजेभ्यः, नववर्षम्, अभिन्नमित्रम्;, कुशलम्, सस्नेहम्, अवसरे, हार्दिक-शुभाशंसाः<br>मञ्जूषा -<br><br>अस्माकं देशे पत्रलेखनस्य प्राचीना परम्परा वर्तते ।<br>संबन्धिजनेभ्यः मित्रेभ्यः पत्राणि लिख्यन्ते ।<br>अधुना जनाः कार्यालयीन कार्याय अपि पत्राणि लिखन्ति ।<br>पत्रलेखनं द्विविधम् भवति > 1. औपचारिकम् / कार्यालयीन पत्रम्<br>2, अनौपचारिकं / व्यक्तिगतम् पत्रम्</td></tr>
<tr><td>शिक्षक गतिविधि एवम् निर्देशाः</td><td>1. शिक्षकः आवेदन पत्रस्य उचित शब्देभ्यः पूर्तिं कारयेत्, छात्रेभ्यं पत्रस्य भावम् विज्ञापयितुं प्रयत्नम् कुर्यात् ।<br>2. आवेदने आगतानाम् शब्दानाम् अर्थम् विशदीकरोतु ।<br>3, पत्रलेखनस्य प्रारूप-क्रमं वक्तव्यम् येन अपराणि अपि पत्राणि लिखितुं सरलता भवेत् ।<br>4.पत्रलेखने संबोधनम् स्थानम् दिनाङ्कं तथा विषयवस्तुं प्रति मार्गदर्शनम् कुर्यात् ।<br>5.औपचारिक अनौपचारिक पत्रस्य भेदः प्रकाराः च उक्त्वा छात्रेभ्यः पत्रलेखनस्य अवसरं दातुम् शक्यते ।</td></tr>
<tr><td>शिक्षण – अधिगम – सामग्री</td><td>चार्टपत्रम्, ppt, youtube</td></tr>
</table>

मूल्याकनम्

1. अवकाश-याचनार्थं प्रधानाचार्यं प्रति प्रार्थनापत्रम्

श्रीमन्तः प्रधानाचार्य महोदयाः
केन्द्रीय विद्यालयः
जनकपुरी
नव दिल्ली

____________ महोदया:
विषयः अवकाश-याचनार्थं प्रधानाचार्यं प्रति प्रार्थनापत्रम्।
सविनयं ____________ इदम् अस्ति यत् गतदिवसात् अहं ____________ ग्रस्तः अस्मि। अत: ____________ आगन्तुम् असमर्थः। एतदर्थं कृपया मह्यम् दिनद्वयस्य ____________ ददातु भवान् इति ____________।
भवदीयः आज्ञाकारी ____________
दिनाङ्क : 12.03.2022

अनुक्रमाङ्क : 35
अष्टमी कक्षा।

| |
|---|
| शिष्यः, अवकाशम्, ज्वरेण, निवेदनम्, विद्यालयम्, आदरणीयाः, अमिताभः, प्रार्थना। |

मञ्जूषा :-

2. शुल्कक्षमार्थं प्रार्थनापत्रम्

श्रीमन्तः प्राचार्य महाभागाः,
केन्द्रीय विद्यालयः
इन्द्रप्रस्थम्।

____________,
सविनयं निवेद्यते यत् मम ____________ कार्यालये लिपिककार्यं करोति। तस्य ____________ परिवारस्य निर्वाहः अपि दुष्करः अस्ति। अतः मासिकशुल्कप्रदानं न सम्भवति। मम शिक्षायां बाधा न ____________ अतः मासिकशुल्कस्य प्रदानेन ____________ प्रदाय अनुग्रहं कुर्वन्तु तत्रभवन्तः श्रीमन्तः।

भवदीयः शिष्यः
धर्मानन्दः
अनुक्रमाङ्कः 12
अष्टमी कक्षा।

दिनांक: 12.01.2022

मञ्जूषा

| | |
|---|---|
| | महोदयाः, मुक्तिम्, भवेत्, वेतनेन, पिता<br><br>3. मित्राय वर्धापनपत्रम्<br><br>935, सेक्टर-13,<br>अर्बन इस्टेट, कुरुक्षेत्रम्<br>दिनांक 28.02.2022<br><br>प्रिय मित्र ____________,<br>सप्रेम नमोनमः।<br>अद्यैव मया शुभा ____________ प्राप्ता यत् भवान् ____________ न केवलम् उत्तीर्णः जातः, अपितु ____________ स्थानं लब्धवान्। अस्मिन् प्रसन्नतायाः अवसरे निजपक्षतः, मम मातृ-पितृ-पक्षतः अपि कोटिशः वर्धापनानि स्वीकरोतु भवान्। शीघ्रं मेलनं ____________।<br><br>भवदीयं मित्रम्<br>आनन्दरूपः<br><br>संङ्केतः<br>प्रति-श्रीधर्मानन्दः<br>छात्रावासः<br>गीता निकेतनम्, नवदिल्ली।<br><br>मञ्जूषा<br><br>धर्मानन्द, प्रतीक्षे, सूचना, प्रथम, परीक्षायाम्<br><br>4. मित्राय विवाहप्रसङ्गे निमन्त्रणपत्रम्<br><br>निज-सङ्केतः<br>नगरम्<br>दिनांकः 10-03-2022<br><br>प्रियमित्र राकेश,<br>अत्र कुशलं ____________। भवान् इदं ____________ अतीव प्रसन्नो भविष्यति यत् मम विवाहः ____________ जातः। आगामिनि मासे प्रथम दिनाङ्के एव ____________ भविष्यति। अस्मिन् अवसरे भवान् द्विदिनपूर्वम् एव आगच्छतु। |

| | |
|---|---|
| | भवदीय स्नेहाङ्कितम्<br>रामकुमारः<br><br>तत्रास्तु, विज्ञाय, भ्रातुः, स्थिरः, माङ्गलिककार्यम्<br>मञ्जूषा :-<br><br>5. पुस्तकप्रेषणाय प्रकाशकं प्रति पत्रम्<br>द्रोण-छात्रावासः,<br>भिवानीतः।<br>दिनांक: 28.01.2022<br>प्रबन्धक महोदयः<br>लक्ष्मी पब्लिकेशंज़,<br>नवदिल्ली।<br><br>श्रीमन्तः,<br>सेवायां निवेदनम् अस्ति ____________ अधोलिखितस्य पुस्तकस्य ____________ आवश्यकता वर्तते। ____________ वी.पी.पी. द्वारा ____________ शीघ्रं प्रेषणीयम्। समग्रं ____________ अपि लेखनीयम्। समुचितं कमीशनं दातव्यम्।<br>1. रुचिरा – अष्टमी श्रेणी – एका प्रतिः।<br><br>भवदीयः,<br>मनोजकुमारः।<br>अष्टमी श्रेणी।<br>अनु. 32<br><br>यद्, पुस्तकम्, विवरणम्, महती, अतः<br>मञ्जूषा :- |
| प्रतिक्रिया<br><br>**Feedback** | 1. छात्राः पत्रलेखने कौशल्य प्राप्नुवन्ति।<br>2. हिन्दी आङ्ग्ल भाषा इव संस्कृते अपि पत्रलेखनस्य अभ्यासं कुर्वन्ति। |

माड्यूल – 9

दिवस **:-** दशमः कक्षा **:** अष्टमी

दिनांक : ----/----/2022 रचनात्मक-लेखनम् (चित्रआधारित कार्यम् )

समय : ……………………

| | |
|---|---|
| शिक्षण – अधिगम – उद्देश्यानि<br><br>**TLOs** | 1. प्रदत्त चित्रम् आधृत्य संस्कृतेन पञ्च वाक्याना निर्माणम्।<br>2. शब्दसूचीम् अधिकृत्य रिक्तस्थान पूर्ति माध्यमेन संस्कृतेन वाक्यनिर्माणे प्रावीण्यं प्राप्यते।<br>3. लेखन कौशल विकासः साध्यते। |

**विषयवस्तु**

**Content**

1. अधोदत्तम् चित्रम् दृष्ट्वा संस्कृते पञ्चवाक्येषु वर्णनम् कुरुत।सहायतार्थं मञ्जूषायाम् पदानि प्रदत्तानि सन्ति।



| |
|---|
| द्वे कुटीरे, द्वौ पशू, तृणानि, उदयं गच्छति, कृषकौ, आनयति, सूर्यः, समीपे, ग्रामस्य, क्षेत्रं प्रति। |

मञ्जूषा :-

1. एतत् ग्रामस्य चित्रम् अस्ति।
2. सूर्यः उदयं गच्छति कृषकौ च क्षेत्रं प्रति गच्छतः।
3. चित्रे द्वे कुटीरे स्तः।
4. कुटीरस्य समीपे द्वौ पशू तिष्ठतः।
5. एकः बालकः तृणानि आनयति।

2. चित्रम् आधृत्य पञ्चवाक्यानि लिखत। सहायतायै पदसूची अधः दत्ता।



| |
|---|
| भ्रमन्ति, पुष्पाणि, उद्यानस्य, बालाः, जनाः, विकसन्ति, भ्रमन्ति, क्रीडन्ति, केदारेषु, वृक्षाः, शोभाम्, पश्यन्ति, आनन्देन, हृष्यन्ति। |

मञ्जूषा

1. एतत् एकस्य उद्यानस्य चित्रम् अस्ति।
2. अत्र बालाः आनन्देन क्रीडन्ति।
3. उद्याने वृक्षाः सन्ति, केदारेषु च पुष्पाणि विकसन्ति।
4. जनाः अत्र भ्रमन्ति, उद्यानस्य च शोभा पश्यन्ति।
5. उद्यानस्य वातावरणे सर्वे हृष्यन्ति।

**शिक्षक गतिविधि एवम् निर्देशाः**

1. शिक्षकः छात्रेभ्यः कर्ता कर्म क्रियायाः परस्पर संबन्ध कृत्वा शुद्ध वाक्यरचनायाः कृते प्रेरयते |
2. कर्ता क्रियायाः संबन्धं स्थापयित्वा सरल वाक्यैः चित्रस्य वर्णनं कर्तुं संभवतः

| | |
|---|---|
| | लट् लकारस्य प्रयोग कर्तु प्रयासः करणीयः ।<br>3. शब्देषु कारकानुसारं विभक्तेः प्रयोगः कर्तुं शक्यते । |
| शिक्षण – अधिगम – सामग्री | चार्टपत्रम्, ppt, youtube<br>चित्रआधारित कार्यम्<br>https://www.tetsuccesskey.com/ |
| मूल्याकनम् | 1. अधोदत्तम् चित्रम् दृष्ट्वा संस्कृते पञ्चवाक्येषु वर्णनम् कुरुत। सहायतार्थ<br>कृष्णः, मधुरम्, पिकस्य, आम्रवृक्षे, वसन्तकाले<br>मञ्जूषायाम् पदानि प्रदत्तानि सन्ति।<br>मञ्जूषा :-<br><br>1. एतत् चित्रम् --------- अस्ति।<br>2. पिकः उद्याने -------- तिष्ठति।<br>3. पिकस्य वर्णः ------- भवति।<br>4. ---------- पिकः कूजति।<br>5. सः -------- कूजति।<br>एतत् प्रकारेण विविधानि चित्राणि प्रस्तूय छात्रेभ्यः वाक्य रचानायाः अवसरः प्रदास्यते |
| प्रतिक्रिया<br>**Feedback** | 1. छात्राः वाक्यरचानाया कौशल्य प्राप्नुवान्ति ।<br>2. संस्कृतेन वाक्यरचनायाः कृते आत्मविश्वासः वर्धते ।<br>3. लेखने रुचि वर्धते । |

माड्यूल – 10

दिवस :- एकादशः कक्षा : अष्टमी

दिनांक : ----/----/2022 संस्कृतगीतम् – "भवतु भारतम्"

समय : ......................

| | |
|---|---|
| शिक्षण – अधिगम – उद्देश्यानि<br>**TLOs** | 1. वर्तनी तथा उच्चारण क्षमतायाः अभ्यासः<br>2. गायन कौशलस्य विकास । |
| विषयवस्तु<br>**Content** | भवतु भारतम् ।<br>शक्तिसम्भृतम् युक्तिसम्भृतम् ।<br>शक्तियुक्तिसम्भृतं भवतु भारतम् ॥<br><br>शस्त्रधारकं शास्त्रधारकम् ।<br>शस्त्रशास्त्रधारकं भवतु भारतम् ॥ |

| | |
|---|---|
| | रीतिसंस्कृतं नीतिसंस्कृतम् ।<br>रीतिनीतिसंस्कृतम् भवतु भारतम् ॥<br><br>कर्मनैष्ठिकं धर्मनैष्ठिकम् ।<br>कर्मधर्मनैष्ठिकम् भवतु भारतम् ॥<br><br>भक्तिसाधकं मुक्तिसाधकम् ।<br>भक्तिमुक्तिसाधकं भवतु भारतम् ॥<br><br>भारतम् भारतम् भवतु भारतम् ॥<br><br>अस्मिन् गीते(कवितायां) भारतवर्षस्य उन्नतेः संपन्नतायाः च कामना कृता अस्ति \| |
| शिक्षक गतिविधि एवम् निर्देशाः | 1. शिक्षकः उचित लय गति अनुसारेण गीत गायति \|<br>2. छात्रान् अनुगायनार्थं प्रेरयति \|<br>3. समानउच्चारण किन्तु भिन्नार्थकानि पदानि स्पष्ट उच्चारण सहितं गायित्वा<br>छात्रेभ्यः संस्कृतेन गायनस्य अवसरं प्रदास्यते \|<br>4. youtube तः अपि संस्कृत गीतानां प्रस्तूति कर्तुं शक्यते \| |
| शिक्षण – अधिगम – सामग्री | चार्टपत्रम्, ppt, youtube<br>चित्रआधारित कार्यम्<br>https://www.sanskritschool.in/sanskrit-geet/sura-vayam-dhira-vayam/<br>https://www.sanskritschool.in/sanskrit-geet/chataka-chataka-sanskrit-song/<br>https://www.sanskritschool.in/sanskrit-geet/patriotism-poetry-in-sanskrit/ |
| मूल्याकनम् | निम्नलिखिता संस्कृत कविता पठित्वा प्रश्नानाम् उत्तराणि निर्देशानुसार लिखत -<br>शूरा वयं धीरा वयं<br>शूरा वयं धीरा वयं वीरा वयं सुतराम्।<br>गुणशालिनो बलशालिनो जयगामिनो नितराम् ॥1॥ शूरा वयं..........................।<br>दृढमानसा गतलालसाः प्रियसाहसाः सततम्।<br>जनसेवका अतिभावुकाः शुभचिन्तका नियतम् ॥2॥ शूरा वयं..........................।<br>धनकामना सुखवासना न च वञ्चना हृदये।<br>ऊर्जस्स्वाला वर्चस्स्वाला अतिनिश्चला विजये ॥3॥ शूरा वयं..........................।<br>गतभीतयो धृतनीतयो दृढशक्तयो निखिला।<br>यामो वयं समराङ्गणं विजयार्थिनो बालाः ॥4॥ शूरा वयं..........................।<br>जगदीश हे ! परमेश हे ! सकलेश हे भगवन्।<br>जयमङ्गलं परमोज्ज्वलं नो देहि परमात्मन् ॥5॥ शूरा वयं.................. |

| | |
|---|---|
| | 1. उपरि लिखितां कवितां पठित्वा रिक्तस्थानानि पूरयत –<br>क) शूरा वयं धीरा वयं ------ वयं सुतराम्।<br>ख) ----------- बलशालिनो जयगामिनो नितराम्<br>ग) धनकामना सुखवासना न च ------------।<br>घ) ऊर्जस्स्वाला --------- अतिनिश्चला विजये<br>2. कवितायाः अंशान् मेलयत -<br>क ख<br>1. दृढमानसा गतलालसाः विजयार्थिनो बालाः<br>2. जनसेवका अतिभावुकाः दृढशक्तयो निखिला।<br>3. गतभीतयो धृतनीतयो शुभचिन्तका नियतम्<br>4. यामो वयं समराङ्गणं प्रियसाहसाः सततम्। |
| प्रतिक्रिया<br>**Feedback** | 1. छात्राः गीतस्य गायनस्य आनन्दम् प्राप्नुवन्ति ।<br>2. संस्कृतेन शब्दोच्चारणस्य आत्मविश्वासः वर्धते।<br>3. भाषणे रुचि वर्धते। |

कार्यपत्रम् **WORKSHEET**

केन्द्रीय विद्यालय संगठन मुम्बई संभाग

सेतु परीक्षा-प्रश्नावली

विद्यालयस्य नाम **:- --------------------------------------------------------------------------------**
छात्रस्य/छात्रायाः नाम **:----------------------------------------------------** कक्षा **:------------------**
रोल **:- --------------------** पूर्णाङ्का**:- 25** दिनाङ्क **:- -----------**
**----------------------------------------------------------------------------------------------------**

**प्र. 1** अधोलिखित-कवितां पठित्वा प्रश्नानाम् उत्तराणि लिखत **|**

एत बालकाः दर्शयामि वस्तेजो हिन्दुस्थानस्य, तेजो भारतवर्षस्य।
अस्य मृत्तिका शिरसा वन्द्या, भूमिरियं बलिदानस्य।
वन्दे मातरं, वन्दे मातरम्॥

उत्तरभागे रक्षणकर्ता नगाधिराजो विख्यातः
दक्षिणदेशे पदक्षालको महासागरः प्रख्यातः।
पश्यत गङ्गायमुनातीरं परं पावनं भूलोके
स्थाने स्थाने यद् दिव्यत्वं नैव सुराणामपि नाके
एकमेव तत् स्थानं चैतत् देवानामवतारस्य ॥अस्य॥

क) एकपदेन उत्तरं लिखत **-** **5.** अङ्काः

1. कविः कस्य तेजः दर्शयति ? -----------------------------

2. इयं कस्य भूमिः अस्ति ? -------------------------------

3. भारतस्य मृत्तिका केन वन्द्या अस्ति ? -----------------

4. भरतस्य उत्तरभागे रक्षणकर्ता कः अस्ति ? ---------------------

5. . पदक्षालको महासागरः भारतस्य कस्यां दिशायाम् अस्ति ? ------------------

प्र. 2 अधोलिखितं अनुच्छेदं पठित्वा प्रश्नानां उत्तराणि निर्देशानुसारं लिखत -

प्रातः काल अति सुखकरः भवति। खगाः मधुरं कूजन्ति। उद्यानेषु पुष्पाणि विकसन्ति। पवनः सुगन्धः शुद्धः च अस्ति। जनाः भ्रमणाय व्यायामाय वा गच्छन्ति। यदा पूर्वस्यां दिशायाम् सूर्यः उदयं गच्छति तदा क्षितिजस्य शोभा दर्शनीया भवति। एतत् मनोहरं दृश्यम् दृष्ट्वा चित्तम् प्रसन्नम् भवति। प्रातः सर्वे जनाः स्व-स्व-कार्यम् उल्लासेन कुर्वन्ति। परम् अलसाः सुप्ताः सन्ति। छात्राः प्रसन्नमुखेन विद्यालयम् पठनाय गच्छन्ति। सर्वे नवजीवनम् अनुभवन्ति।

क) पूर्णवाक्येन उत्तरम् लिखत - **5** अङ्काः

1. प्रातःकाल कीदृशः भवति?

उत्तरम् -----------------------------------------------------------------------------------------------

2. के मधुरं कुजन्ति?

उत्तरम् -----------------------------------------------------------------------------------------------

3. जनाः किमर्थम् गच्छन्ति?

उत्तरम् -----------------------------------------------------------------------------------------------

4. सर्वे किम् अनुभवन्ति?

उत्तरम् -----------------------------------------------------------------------------------------------

5. यदा पूर्वस्यां दिशायाम् सूर्यः उदयं गच्छति तदा किं भवति ?

उत्तरम् -----------------------------------------------------------------------------------------------

**3.** निम्नलिखितेषु वाक्येषु उचितं धातुरूपं चित्वा लिखत _ **5.** अङ्काः

1. श्यामः पुस्तकम् --------------।  (पठन्ति / पठसि / पठति)
2. सीता गीतम्  -----------------।  ( गायति / गायतः / गायामि )
3. मित्रम् पत्रम् लिखति। ------- |  ( लिखामि / लिखसि / लिखति )
4. रामः दशरथस्य पुत्रः ----------।  ( आस्ताम् / आसीत्  / आसन् )
5. श्वः सोमवासरः ------------  ।  (भविष्यति / भविष्यतः / भविष्यन्ति )

**4.** मञ्जूषायाः सहायतया चित्रम् आधृत्य पञ्चवाक्यानि संस्कृतेन लिखत-



मञ्जूषा :-

| जनाः  समुद्रे  क्रीडन्ति  वृक्षाः  समुद्रतटस्य |
| --- |

1. एतत् ---------------- दृश्यम् अस्ति।
2. अत्र ------- सुखेन सूर्यस्नानं कुर्वन्ति।
3. समुद्रतटे बालाः आनन्देन ------------ ।

4. ---------  नौकाः तरन्ति।
5. हरिताः --------------- तटम् अलंकुर्वन्ति।

**4.** निम्नलिखिते पत्रे रिक्तस्थानानि पूरयत - **5.** अङ्काः

अवकाशहेतोः प्रार्थनापत्रम् (ज्वरकारणात्)

4/10, जयदेव पार्क,
दिल्ली – 26

श्रीमन्तः प्राचार्यमहोदयः,
जिन्दल पब्लिक स्कूल,
पंजाबी बाग, दिल्ली।
आदरणीयाः महोदयाः,
सेवायाम् ____________ अस्ति यद् अहं ____________ ग्रस्तः अस्मि। अतः पाठशालाम् आगन्तुं न शक्नोमि। तदर्थम् आगामिनः ____________ अवकाशः प्रदीयताम् इति प्रार्थये।
____________ आज्ञाकारी शिष्यः
प्रवीर कुमारः
अनुक्रमाङ्कः
अष्टमी कक्षा।
____________ 20.1.2022

मञ्जूषा

| |
|---|
| दिनाङ्कः, भवताम, निवेदनम्, ज्वरेण, दिनद्वयस्य |